M 8684

GOVT. BRENNEN COLLEGE THALASSERY LIBRARY

Reg. No. : ...............................

Name : ...................................

## II Semester B.A. Degree (CCSS – Supple./Improv.) Examination, May 2015
## (2013 and Earlier Admn.)
## Core Course in Sanskrit
## 2BO2SKT : GADYAKAVYA AND KHANDAKAVYA

Time : 3 Hours Max. Weightage : 30

*सूचना : सर्वे प्रश्नाः संस्कृतभाषयैव समाधेयाः ।*

I. कोष्ठात् समुचितमुत्तरं निर्धार्य लिखत ।

1) a) पञ्चतन्त्रं केन विरचितम् ?

(कालिदासेन, सुकुमारेण, कौटिल्येन, विष्णुशर्मणा)

b) उदर्कं इति पदस्य अर्थः कः ?

(परिणामः, अन्त्यं, प्रारम्भः, परिमितिः)

c) अयं निजः परो वेति चिन्ता केषाम् ?

(महात्मनां, लघुचेतसां, मनुष्याणां, नारीणाम् )

d) बडवानलं कः बिभर्ति ?

(नदी, पर्वतः, समुद्रः, पृथिवी) **(1×1=1)**

2) a) राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः – कः ?

(यक्षः, कैलासः, परमशिवः, मेघः)

b) प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार । – कः ?

(यक्षः, कालिदासः, रामगिरिः, मेघः)

c) सेविष्यन्ते नयनसुभगं भवन्तम् – के ?

(नागरिकाः, स्त्रियः, हंसाः, बलाकाः)

d) हर पशुपतेरार्द्रनागेजिनेच्छाम् – कदा ?

(निशायां, नृत्तारम्भे, प्रभाते, प्रस्थानकाले) **(1×1=1)**

P.T.O.

II. द्वे व्याख्यात :

3) यस्त्यक्त्वा सापदं मित्रं याति निष्ठुरतां वहन्।
कृतघ्नस्तेन पापेन् नरके यात्यसंशयम्।।

4) एवं च भाषते लोकश्चन्दनं किल शीतलम्।
पुत्रगात्रस्य संस्पर्शश्चन्दनादतिरिच्यते।।

5) अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति।
जीवत्यनाथोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहेन जीवति।। (2x2=4)

III. द्वे व्याख्यात :

6) नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढैराविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम्।
जग्ध्वारण्येष्वधिकसुरभि गन्धमाघ्राय चोर्वाः सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम्।।

7) तस्यस्थित्वा कथमपि पुरः कौतुकाधानहेतोरन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे।।

8) गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं रुद्धालोकेनरपतिपथे सूचिभेद्यैस्तमोभिः।
सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वी तोयोत्सर्गस्तनितमुखरो मास्मभूर्विक्लबास्ताः।। (2x2=4)

IV. सप्रकरणं **त्रयाणामाशयं** विशदयत।

9) राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः।

10) अतिविस्तारविस्तीर्णं तद् भवेन्न चिरायुषम्।

11) तत्प्रभावात्पुनः स्वर्गं स्पर्धते त्रिदशैः सह।

12) तद् गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्।

13) धन्यास्ते ये न पश्यन्ति देशभङ्गं कुलक्षयम्।। (2x3=6)

V. सप्रकरणं **त्रयाणामाशयं** विशदयत।

14) न स्यादन्योऽप्ययमिव जनो यः पराधीन वृत्तिः।

15) सौधोत्सङ्ग प्रणयविमुखो मा स्मभूरुज्जयिन्याः।



16) संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः।

17) सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि।

18) स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु। (2x3=6)

VI. द्वे उत्तरयत।

19) 'न बन्धुमध्ये धनहीनजीवितम्' – अत्रोदिष्टां दारिद्र्यावस्थां पञ्चतन्त्रदिशा विवृणुत।

**अथवा**

पञ्चतन्त्रोक्त रीत्या पुत्रस्य महत्वं विवृणुत।

20) यक्षनिर्दिष्टां मेघस्य अलकायात्रां संक्षिपत।

**अथवा**

मेघदूतानुसारं 'उपमा कालिदासस्य' इत्युक्तिं साधयत। (4x2=8)

---